# ऋतुसंहारम्

Exported from ambuda.org on 2025-12-23 07:27:32 UTC

1.head

प्रथमः सर्गः

1.1

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसंचयः ।दिनान्तरम्यो ऽभ्युपशान्तमन्मथो निदाघकालो ऽयमुपागतः प्रिये ॥

1.2

निशाः शशाङ्कक्षतनीलराजयः क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥

1.3

सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकम्पितं मधु ।सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथे ऽनुभवन्ति कामिनः ॥

1.4

नितम्बबिम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः ।शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामिनाम् ॥

1.5

नितान्तलाक्षारसरागरञ्जितैर् नितम्बिनीनां चरणैः सनूपुरैः ।पदे पदे हंसरुतानुकारिभिर् जनस्य चित्तं क्रियते समन्मथम् ॥

1.6

पयोधराश्चन्दनपङ्कचर्चितास् तुषारगौरार्पितहारशेखराः ।नितम्बदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकम् ॥

1.7

समुद्गतस्वेदचिताङ्गसंधयो विमुच्य वासांसि गुरूणि साम्प्रतम् ।स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयन्ति प्रमदाः सयौवनाः ॥

1.8

सचन्दनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमण्डलार्पणैः ।सवल्लकीकाकलिगीतनिस्वनैर् विबोध्यते सुप्त इवाद्य मन्मथः ॥

1.9

सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः ।विलोक्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम् ॥

1.10

असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही ।न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः ॥

1.11

मृगाः प्रचण्डातपतापिता भृशं तृषा महत्या परिशुष्कतालवः ।वनान्तरे तोयमिति प्रधाविता निरीक्ष्य भिन्नाञ्जनसंनिभं नभः ॥

1.12

सविभ्रमैः सस्मितजिह्मवीक्षितैर् विलासवत्यो मनसि प्रवासिनाम् ।अनङ्गसंदीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूषणाः ॥

1.13

रवेर्मयूखैर् अभितापितो भृशं विदह्यमानः पथि तप्तपांसुभिः ।अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति ॥

1.14

तृषा महत्या हतविक्रमोद्यमः श्वसन्मुहुर् दूरविदारिताननः ।न हन्त्यदूरे ऽपि गजान्मृगेश्वरो विलोलजिह्वश्चलिताग्रकेसरः ॥

1.15

विशुष्ककण्ठोद्गतसीकराम्भसो गभस्तिभिर् भानुमतो ऽनुतापिताः ।प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणो ऽपि बिभ्यति ॥

1.16

हुताग्निकल्पैः सवितुर्गभस्तिभिः कलापिनः क्लान्तशरीरचेतसः ।न भोगिनं घ्नन्ति समीपवर्तिनं कलापचक्रेषु निवेशिताननम् ॥

1.17

सभद्रमुस्तं परिशुष्ककर्दमं सरः खनन्न् आयतपोतृमण्डलैः ।रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलम् ॥

1.18

विवस्वता तीक्ष्णतरांशुमालिना सपङ्कतोयात् सरसो ऽभितापितः ।उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति ॥

1.19

समुद्धृताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसम् ।परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सान्द्रविमर्दकर्दमम् ॥

1.20

रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ।विषाग्निसूर्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः ॥

1.21

सफेनलालावृतवक्त्रसम्पुटं विनिःसृतालोहितजिह्वमुन्मुखम् ।तृषाकुलं निःसृतमद्रिगह्वराद् अवेक्षमाणं महिषीकुलं जलम् ॥

1.22

पटुतरदवदाहोच्छुष्कसस्य प्ररोहाः परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।दिनकरपरितापक्षीणतोयाः समन्ताद् विदधति भयमुच्चैर् वीक्ष्यमाणा वनान्ताः ॥

1.23

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः कपिकुलमुपयाति क्लान्तमद्रेर् निकुञ्जम् ।भ्रमति गवययूथः सर्वतस्तोयमिच्छञ् शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥

1.24

विकचनवकुसुम्भस्वच्छसिन्दूरभासा प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।तटविटपलताग्रालिङ्गनव्याकुलेन दिशि दिशि परिदग्धा भूमयः पावकेन ॥

1.25

ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ।प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥

1.26

बहुतर इव जातः शाल्मलीनां वनेषु स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।परिणतदलशाखानुत्पतन्प्रांशुवृक्षान् भ्रमति पवनधूतः सर्वतो ऽग्निर्वनान्ते ॥

1.27

गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः सुहृद इव समेता द्वंद्वभावं विहाय ।हुतवहपरिखेदाद् आशु निर्गत्य कक्षाद् विपुलपुलिनदेशां निम्नगां संविशन्ति ॥

1.28

कमलवनचिताम्बुः पाटलामोदरम्यः सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः ।व्रजतु तव निदाघः कामिनीभिः समेतो निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥

2.head

द्वितीयः सर्गः

2.1

ससीकराम्भोधरमत्तकुञ्जरस् तडित्पताको ऽशनिशब्दमर्दलः ।समागतो राजवद् उद्धतद्युतिर् घनागमः कामिजनप्रियः प्रिये ॥

2.2

नितान्तनीलोत्पलपत्त्रकान्तिभिः क्वचित् प्रभिन्नाञ्जनराशिसंनिभैः ।क्वचित्सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः ॥

2.3

तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास् तोयभरावलम्बिनः ।प्रयान्ति मन्दं बहुधारवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ॥

2.4

बलाहकाश्चाशनिशब्दमर्दलाः सुरेन्द्रचापं दधतस्तडिद्गुणम् ।सुतीक्ष्णधारापतनोग्रसायकैस् तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥

2.5

प्रभिन्नवैडूर्यनिभैस् तृणाङ्कुरैः समाचिता प्रोत्थितकन्दलीदलैः ।विभाति शुक्लेतररत्नभूषिता वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥

2.6

सदा मनोज्ञं स्वनदुत्सवोत्सुकं विकीर्णविस्तीर्णकलापिशोभितम् ।ससंभ्रमालिङ्गनचुम्बनाकुलं प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥

2.7

निपातयन्त्यः परितस्तटद्रुमान् प्रवृद्धवेगैः सलिलैर् अनिर्मलैः ।स्त्रियः सुदुष्टा इव जातिविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥

2.8

तृणोत्करैर् उद्गतकोमलाङ्कुरैश् चितानि नीलैर् हरिणीमुखक्षतैः ।वनानि वैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर् द्रुमैः ॥

2.9

विलोलनेत्रोत्पलशोभिताननैर् मृगैः समन्तादुपजातसाध्वसैः ।समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रकरोति चेतसः ॥

2.10

अभीक्ष्णमुच्चैर् ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि ।तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः ॥

2.11

पयोधरैर् भीमगभीरनिस्वनैस् तडिद्भिर् उद्वेजितचेतसो भृशम् ।कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम् ॥

2.12

विलोचनेन्दीवरवारिबिन्दुभिर् निषिक्तबिम्बाधरचारुपल्लवाः ।निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥

2.13

विपाण्डुरं कीटरजस्तृणान्वितं भुजंगवद् वक्रगतिप्रसर्पितम् ।ससाध्वसैर्भेककुलैर् निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम् ॥

2.14

विपत्त्रपुष्पां नलिनीं समुत्सुका विहाय भृङ्गाः श्रुतिहारिनिस्वनाः ।पतन्ति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया ॥

2.15

वनद्विपानां नववारिदस्वनैर् मदान्वितानां ध्वनतां मुहुर्मुहुः ।कपोलदेशा विमलोत्पलप्रभाः सभृङ्गयूथैर् मदवारिभिश् चिताः ॥

2.16

सितोत्पलाभाम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समन्ततः ।प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः ॥

2.17

कदम्बसर्जार्जुनकेतकीवनं विकम्पयंस्तत्कुसुमाधिवासितः ।ससीकराम्भोधरसङ्गशीतलः समीरणः कं न करोति सोत्सुकम् ॥

2.18

शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः ।स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं संजनयन्ति कामिनाम् ॥

2.19

वहन्ति वर्षन्ति नदन्ति भान्ति व्यायन्ति नृत्यन्ति समाश्रयन्ति ।नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवंगाः ॥

2.20

तडिल्लताशक्रधनुर्विभूषिताः पयोधरास्तोयभरावलम्बिनः ।स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला हरन्ति चेतो युगपत्प्रवासिनाम् ॥

2.21

मालाः कदम्बनवकेसरकेतकीभिर् आयोजिताः शिरसि बिभ्रति योषितो ऽद्य ।कर्णान्तरेषु ककुभद्रुममञ्जरीभिर् इच्छानुकूलरचितान् अवतंसकांश्च ॥

2.22

कालागुरुप्रचरचन्दनचर्चिताङ्ग्यः पुष्पावतंससुरभीकृतकेशपाशाः ।श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः ॥

2.23

कुवलयदलनीलैर् उन्नतैस् तोयनम्रैर् मृदुपवनविधूतैर् मन्दमन्दं चलद्भिः ।अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः पथिकजनवधूनां तद्वियोगाकुलानाम् ॥

2.24

मुदित इव कदम्बैर्जातपुष्पैः समन्तात् पवनचलितशाखैः शाखिभिर्नृत्यतीव ।हसितमिव विधत्ते सूचिभिः केतकीनां नवसलिलनिषेकच्छिन्नतापो वनान्तः ॥

2.25

शिरसि बकुलमालां मालतीभिः समेतां विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च ।विकचनवकदम्बैः कर्णपूरं वधूनां रचयति जलदौघः कान्तवत्काल एषः ॥

2.26

दधति वरकुचाग्रैरुन्नतैर् हारयष्टिं प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।नवजलकणसेकादुद्गतां रोमराजीं ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः ॥

2.27

नवजलकणसङ्गाच्छीततामादधानः कुसुमभरनतानां लासकः पादपानाम् ।जनितरुचिरगन्धः केतकीनां रजोभिः परिहरति नभस्वान् प्रोषितानां मनांसि ॥

2.28

जलभरनमितानाम् आश्रयो ऽस्माकम् उच्चैर् अयमिति जलसेकैस्तोयदास्तोयनम्राः ।अतिशयपरुषाभिर् ग्रीष्मवह्नेः शिखाभिः समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥

2.29

बहुगुणरमणीयः कामिनीचित्तहारी तरुविटपलतानां बान्धवो निर्विकारः ।जलदसमय एष प्राणिनां प्राणभूतो दिशतु तव हितानि प्रायशो वाञ्छितानि ॥

3.head

तृतीयः सर्गः

3.1

काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या ।आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या ॥

3.2

काशैर् मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि ।सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः ॥

3.3

चञ्चन्मनोज्ञशफरीरसनाकलापाः पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।नद्यो विशालपुलिनान्तनितम्बबिम्बा मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥

3.4

व्योम क्वचिद्रजतशङ्खमृणालगौरैस् त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।संलक्ष्यते पवनवेगचलैः पयोदै राजेव चामरशतैर् उपवीज्यमानः ॥

3.5

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं बन्धूकपुष्परजसारुणिता च भूमिः ।वप्राश्च पक्वकलमावृतभूमिभागाः प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥

3.6

मन्दानिलाकुलितचारुतराग्रशाखः पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।मत्तद्विरेफपरिपीतमधुप्रसेकश् चित्तं विदारयति कस्य न कोविदारः ॥

3.7

तारागणप्रवरभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥

3.8

कारण्डवाननविघट्टितवीचिमालाः कादम्बसारसकुलाकुलतीरदेशाः ।कुर्वन्ति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजो ऽरुणितास् तटिन्यः ॥

3.9

नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः शिशिरसीकरवारिवर्षी ।पत्युर्वियोगविषदग्धशरक्षतानां चन्द्रो दहत्यतितरां तनुमङ्गनानाम् ॥

3.10

आकम्पयन् फलभरानतशालिजालान् यानर्तयंस् तरुवरान् कुसुमावनम्रान् ।उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन् न्यूनां मनश्चलयति प्रसभं नभस्वान् ॥

3.11

सोन्मादहंसमिथुनैरुपशोभितानि स्वच्छप्रफुल्लकमलोत्पलभूषितानि ।मन्दप्रभातपवनोद्गतवीचिमालान्य् उत्कण्ठयन्ति सहसा हृदयं सरांसि ॥

3.12

नष्टं धनुर्बलभिदो जलदोदरेषु सौदामिनी स्फुरति नाद्य वियत्पताका ।धुन्वन्ति पक्षपवनैर्न नभो बलाकाः पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥

3.13

नृत्यप्रयोगरहिताञ्शिखिनो विहाय हंसानुपैति मदनो मधुरप्रगीतान् ।मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान् सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥

3.14

शेफालिकाकुसुमगन्धमनोहराणि स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।पर्यन्तसंस्थितमृगीनयनोत्पलानि प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥

3.15

कह्लारपद्मकुमुदानि मुहुर्विधुन्वंस् तत्संगमादधिकशीतलतामुपेतः ।उत्कण्ठयत्यतितरां पवनः प्रभाते पत्रान्तलग्नतुहिनाम्बुविधूयमानः ॥

3.16

सम्पन्नशालिनिचयावृतभूतलानि स्वस्थस्थितप्रचुरगोकुलशोभितानि ।हंसैः ससारसकुलैः प्रतिनादितानि सीमान्तराणि जनयन्ति नृणां प्रमोदम् ॥

3.17

हंसैर्जिता सुललिता गतिरङ्गनानाम् अम्भोरुहैर् विकसितैर्मुखचन्द्रकान्तिः ।नीलोत्पलैर्मदकलानि विलोचनानि भ्रूविभ्रमाश्च रुचिरास् तनुभिस् तरंगैः ॥

3.18

श्यामा लताः कुसुमभारनतप्रवालाः स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।दन्तावभासविशदस्मितचन्द्रकान्तिं कङ्केलिपुष्परुचिरा नवमालती च ॥

3.19

केशान्नितान्तघननीलविकुञ्चिताग्रान् आपूरयन्ति वनिता नवमालतीभिः ।कर्णेषु च प्रवरकाञ्चनकुण्डलेषु नीलोत्पलानि विविधानि निवेशयन्ति ॥

3.20

हारैः सचन्दनरसैः स्तनमण्डलानि श्रोणीतटं सुविपुलं रसनाकलापैः ।पादाम्बुजानि कलनूपुरशेखरैश्च नार्यः प्रहृष्टमनसो ऽद्य विभूषयन्ति ॥

3.21

स्फुटकुमुदचितानां राजहंसाश्रितानां मरकतमणिभासा वारिणा भूषितानाम् ।श्रियमतिशयरूपां व्योम तोयाशयानां वहति विगतमेघं चन्द्रतारावकीर्णम् ॥

3.22

शरदि कुमुदसङ्गाद्वायवो वान्ति शीता विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।विगतकलुषमम्भः श्यानपङ्का धरित्री विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥

3.23

करकमलमनोज्ञाः कान्तसंसक्तहस्ता वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः ।रचितकुसुमगन्धि प्रायशो यान्ति वेश्म प्रबलमदनहेतोस्त्यक्तसंगीतरागाः ॥

3.24

सुरतरसविलासाः सत्सखीभिः समेता असमशरविनोदं सूचयन्ति प्रकामम् ।अनुपममुखरागा रात्रिमध्ये विनोदं शरदि तरुणकान्ताः सूचयन्ति प्रमोदान् ॥

3.25

दिवसकरमयूखैर् बाध्यमानं प्रभाते वरयुवतिमुखाभं पङ्कजं जृम्भते ऽद्य ।कुमुदमपि गते ऽस्तं लीयते चन्द्रबिम्बे हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥

3.26

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।अधररुचिरशोभां बन्धुजीवे प्रियाणां पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥

3.27

स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं काम्यं च हंसवचनं मणिनूपुरेषु ।बन्धूककान्तिमधरेषु मनोहरेषु क्वापि प्रयाति सुभगा शरदागमश्रीः ॥

3.28

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी विकसितनवकाशश्वेतवासो वसाना ।कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम् ॥

4.head

चतुर्थः सर्गः

4.1

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतो ऽयम् ॥

4.2

मनोहरैश् चन्दनरागगौरैस् तुषारकुन्देन्दुनिभैश् च हारैः ।विलासिनीनां स्तनशालिनीनां नालंक्रियन्ते स्तनमण्डलानि ॥

4.3

न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि ।नितम्बबिम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ॥

4.4

काञ्चीगुणैः काञ्चनरत्नचित्रैर् नो भूषयन्ति प्रमदा नितम्बान् ।न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजान्य् अम्बुजकान्तिभाञ्जि ॥

4.5

गात्राणि कालीयकचर्चितानि सपत्त्रलेखानि मुखाम्बुजानि ।शिरांसि कालागुरुधूपितानि कुर्वन्ति नार्यः सुरतोत्सवाय ॥

4.6

रतिश्रमक्षामविपाण्डुवक्त्राः सम्प्राप्तहर्षाभ्युदयास् तरुण्यः ।हसन्ति नोच्चैर् दशनाग्रभिन्नान् प्रपीड्यमानान् अधरान् अवेक्ष्य ॥

4.7

पीनस्तनोरःस्थलभागशोभाम् आसाद्य तत्पीडनजातखेदः ।तृणाग्रलग्नैस्तुहिनैः पतद्भिर् आक्रन्दतीवोषसि शीतकालः ॥

4.8

प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।मनोहरक्रौञ्चनिनादितानि सीमान्तराण्य् उत्सुकयन्ति चेतः ॥

4.9

प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि ।प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम् ॥

4.10

मार्गं समीक्ष्यातिनिरस्तनीरं प्रवासखिन्नं पतिमुद्वहन्त्यः ।अवेक्ष्यमाणा हरिणेक्षणाक्ष्यः प्रबोधयन्तीव मनोरथानि ॥

4.11

पाकं व्रजन्ती हिमजातशीतैर् आधूयमाना सततं मरुद्भिः ।प्रिये प्रियङ्गुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव ॥

4.12

पुष्पासवामोदसुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः ।परस्पराङ्गव्यतिषङ्गशायी शेते जनः कामरसानुविद्धः ॥

4.13

दन्तच्छदैः सव्रणदन्तचिह्नैः स्तनैश्च पाण्यग्रकृताभिलेखैः ।संसूच्यते निर्दयमङ्गनानां रतोपभोगो नवयौवनानाम् ॥

4.14

काचिद्विभूषयति दर्पणसक्तहस्ता बालातपेषु वनिता वदनारविन्दम् ।दन्तच्छदं प्रियतमेन निपीतसारं दन्ताग्रभिन्नम् अवकृष्य निरीक्षते च ॥

4.15

अन्या प्रकामसुरतश्रमखिन्नदेहा रात्रिप्रजागरविपाटलनेत्रपद्मा ।स्रस्तांसदेशललिताकुलकेशपाशा निद्रां प्रयाति मृदुसूर्यकराभितप्ता ॥

4.16

निर्माल्यदाम परिभुक्तमनोज्ञगन्धं मूर्ध्नो ऽपनीय घननीलशिरोरुहान्ताः ।पीनोन्नतस्तनभरानतगात्रयष्ट्यः कुर्वन्ति केशरचनामपरास्तरुण्यः ॥

4.17

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं हर्षान्विता विरचिताधरचारुशोभा ।कूर्पासकं परिदधाति नखक्षताङ्गी व्यालम्बिनीलललितालककुञ्चिताक्षी ॥

4.18

अन्याश्चिरं सुरतकेलिपरिश्रमेण खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।संहृष्यमाणपुलकोरुपयोधरान्ता अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ॥

4.19

बहुगुणरमणीयो योषितां चित्तहारी परिणतबहुशालिव्याकुलग्रामसीमा ।विनिपतिततुषारः क्रौञ्चनादोपगीतः प्रदिशतु हिमयुक्तः काल एषः सुखं वः ॥

5.head

पञ्चमः सर्गः

5.1

प्ररूढशालीक्षुचयावृतक्षितिं क्वचित्स्थितक्रौञ्चनिनादराजितम् ।प्रकामकामं प्रमदाजनप्रियं वरोरु कालं शिशिराह्वयं शृणु ॥

5.2

निरुद्धवातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः ।गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति काले ऽत्र जनस्य सेव्यताम् ॥

5.3

न चन्दनं चन्द्रमरीचिशीतलं न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति साम्प्रतम् ॥

5.4

तुषारसंघातनिपातशीतलाः शशाङ्कभाभिः शिशिरीकृताः पुनः ।विपाण्डुतारागणचारुभूषणा जनस्य सेव्या न भवन्ति रात्रयः ॥

5.5

गृहीतताम्बूलविलेपनस्रजः पुष्पासवामोदितवक्त्रपङ्कजाः ।प्रकामकालागुरुधूपवासितं विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥

5.6

कृतापराधान्बहुशो ऽभितर्जितान् सवेपथून् साध्वसलुप्तचेतसः ।निरीक्ष्य भर्तॄन् सुरताभिलाषिणः स्त्रियो ऽपराधान्समदा विसस्मरुः ॥

5.7

प्रकामकामैर् युवभिः सुनिर्दयं निशासु दीर्घास्वभिरामिताश्चिरम् ।भ्रमन्ति मन्दं श्रमखेदितोरवः क्षपावसाने नवयौवनाः स्त्रियः ॥

5.8

मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयकभूषितोरवः ।निवेशितान्तः कुसुमैः शिरोरुहैर् विभूषयन्तीव हिमागमं स्त्रियः ॥

5.9

पयोधरैः कुङ्कुमरागपिञ्जरैः सुखोपसेव्यैर्नवयौवनोष्मभिः ।विलासिनीभिः परिपीडितोरसः स्वपन्ति शीतं परिभूय कामिनः ॥

5.10

सुगन्धिनिःश्वासविकम्पितोत्पलं मनोहरं कामरतिप्रबोधकम् ।निशासु हृष्टा सह कामिभिः स्त्रियः पिबन्ति मद्यं मदनीयमुत्तमम् ॥

5.11

अपगतमदरागा योषिदेका प्रभाते कृतनिबिडकुचाग्रा पत्युरालिङ्गनेन ।प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं व्रजति शयनवासाद्वासमन्यं हसन्ती ॥

5.12

अगुरुसुरभिधूपामोदितं केशपाशं गलितकुसुममालं कुञ्चिताग्रं वहन्ती ।त्यजति गुरुनितम्बा निम्ननाभिः सुमध्या उषसि शयनमन्या कामिनी चारुशोभाम् ॥

5.13

कनककमलकान्तैश् चारुताम्राधरोष्ठैः श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।उषसि वदनबिम्बैरंससंसक्तकेशैः श्रिय इव गृहमध्ये संस्थिता योषितो ऽद्य ॥

5.14

पृथुजघनभरार्ताः किंचिदानम्रमध्याः स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः ।सुरतसमयवेषं नैशमाशु प्रहाय दधति दिवसयोग्यं वेशमन्यास्तरुण्यः ॥

5.15

नखपदचितभागान् वीक्षमाणाः स्तनान्तान् अधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।अभिमतरतवेषं नन्दयन्त्यस्तरुण्यः सवितुरुदयकाले भूषयन्त्याननानि ॥

5.16

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः प्रबलसुरतकेलिर्जातकन्दर्पदर्पः ।प्रियजनरहितानां चितसंतापहेतुः शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् ॥

6.head

षष्ठः सर्गः [वसन्तवर्णन]

6.1

प्रफुल्लचूताङ्कुरतीक्ष्णसायको द्विरेफमालाविलसद्धनुर्गुणः ।मनांसि भेत्तुं सुरतप्रसङ्गिनां वसन्तयोद्धा समुपागतः प्रिये ॥

6.2

द्रुमाः सपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगन्धिः ।सुखाः प्रदोषा दिवसाश्च रम्याः सर्वं प्रिये चारुतरं वसन्ते ॥

6.3

ईषत्तुषारैः कृतशीतहर्म्यः सुवासितं चारुशिरश्च चम्पकैः ।कुर्वन्ति नार्यो ऽपि वसन्तकाले स्तनं सहारं कुसुमैर्मनोहरैः ॥

6.4

वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम् ।चूतद्रुमाणां कुसुमान्वितानां ददाति सौभाग्यमयं वसन्तः ॥

6.5

कुसुम्भरागारुणितैर् दुकूलैर् नितम्बबिम्बानि विलासिनीनाम् ।तन्वंशुकैः कुङ्कुमरागगौरैर् अलंक्रियन्ते स्तनमण्डलानि ॥

6.6

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम् ।पुष्पं च फुल्लं नवमल्लिकायाः प्रयान्ति कान्तिं प्रमदाजनानाम् ॥

6.7

स्तनेषु हाराः सितचन्दनार्द्रा भुजेषु सङ्गं वलयाङ्गदानि ।प्रयान्त्यनङ्गातुरमानसानां नितम्बिनीनां जघनेषु काञ्च्यः ॥

6.8

सपत्रलेखेषु विलासिनीनां वक्त्रेषु हेमाम्बुरुहोपमेषु ।रत्नान्तरे मौक्तिकसङ्गरम्यः स्वेदागमो विस्तरतामुपैति ॥

6.9

उच्छ्वासयन्त्यः श्लथबन्धनानि गात्राणि कन्दर्पसमाकुलानि ।समीपवर्तिष्वधुना प्रियेषु समुत्सुका एव भवन्ति नार्यः ॥

6.10

तनूनि पाण्डूनि मदालसानि मुहुर्मुहुर् जृम्भणतत्पराणि ।अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्यससंभ्रमाणि ॥

6.11

छायां जनः समभिवाञ्छति पादपानां नक्तं तथेच्छति पुनः किरणं सुधांशोः ।हर्म्यं प्रयाति शयितुं सुखशीतलं च कान्तां च गाढमुपगूहति शीतलत्वात् ॥

6.12

नेत्रेषु लोलो मदिरालसेषु गण्डेषु पाण्डुः कठिनः स्तनेषु ।मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनङ्गो बहुधा स्थितो ऽद्य ॥

6.13

अङ्गानि निद्रालसविभ्रमाणि वाक्यानि किंचिन्मदिरालसानि ।भ्रूक्षेपजिह्मानि च वीक्षितानि चकार कामः प्रमदाजनानाम् ॥

6.14

प्रियङ्गुकालीयककुङ्कमाक्तं स्तनेषु गौरेषु विलासिनीभिः ।आलिप्यते चन्दनम् अङ्गनाभिर् मदालसाभिर् मृगनाभियुक्तम् ॥

6.15

गुरूणि वासांसि विहाय तूर्णं तनूनि लाक्षारसरञ्जितानि ।सुगन्धिकालागुरुधूपितानि धत्ते जनः काममदालसाङ्गः ॥

6.16

पुंस्कोकिलश् चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः ।कूजद्द्विरेफाप्ययम् अम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटु ॥

6.17

ताम्रप्रवालस्तबकावनम्राश् चूतद्रुमाः पुष्पितचारुशाखाः ।कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम् ॥

6.18

आमूलतो विद्रुमरागताम्रं सपल्लवाः पुष्पचयं दधानाः ।कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् ॥

6.19

मत्तद्विरेफपरिचुम्बितचारुपुष्पा मन्दानिलाकुलितनम्रमृदुप्रवालाः ।कुर्वन्ति कामिमनसां सहसोत्सुकत्वं बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥

6.20

कान्तामुखद्युतिजुषामचिरोद्गतानां शोभां परां कुरबकद्रुममञ्जरीणाम् ।दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य कन्दर्पबाणपतनव्यथितं हि चेतः ॥

6.21

आदीप्तवह्निसदृशैर् मरुतावधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।सद्यो वसन्तसमयेन समाचितेयं रक्तांशुका नववधूरिव भाति भूमिः ॥

6.22

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं किं कर्णिकारकुसुमैर्न कृतं नु दग्धम् ।यत्कोकिलः पुनरयं मधुरैर्वचोभिर् यूनां मनः सुवदनानिहितं निहन्ति ॥

6.23

पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।लज्जान्वितं सविनयं हृदयं क्षणेन पर्याकुलं कुलगृहे ऽपि कृतं वधूनाम् ॥

6.24

आकम्पयन्कुसुमिताः सहकारशाखा विस्तारयन्परभृतस्य वचांसि दिक्षु ।वायुर् विवाति हृदयानि हरन्नराणां नीहारपातविगमात्सुभगो वसन्ते ॥

6.25

कुन्दैः सविभ्रमवधूहसितावदातैर् उद्द्योतितान्युपवनानि मनोहराणि ।चित्तं मुनेरपि हरन्ति निवृत्तरागं प्रागेव रागमलिनानि मनांसि यूनाम् ॥

6.26

आलम्बिहेमरसनाः स्तनसक्तहाराः कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।मासे मधौ मधुरकोकिलभृङ्गनादैर् नार्या हरन्ति हृदयं प्रसभं नराणाम् ॥

6.27

नानामनोज्ञकुसुमद्रुमभूषितान् तान् हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।शैलेयजालपरिणद्धशिलातलान्तान् दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥

6.28

नेत्रे निमीलयति रोदिति याति शोकं घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।कान्तावियोगपरिखेदितचित्तवृत्तिर् दृष्ट्वाध्वगः कुसुमितान्सहकारवृक्षान् ॥

6.29

समदमधुकराणां कोकिलानां च नादैः कुसुमितसहकारैः कर्णिकारैश् च रम्यः ।इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां तुदति कुसुममासो मन्मथोद्दीपनाय ॥

6.30

रुचिरकनककान्तीन् मुञ्चतः पुष्पराशीन् मृदुपवनविधूतान्पुष्पितांश्चूतवृक्षान् ।अभिमुखमभिवीक्ष्य क्षामदेहो ऽपि मार्गे मदनशरनिघातैर् मोहमेति प्रवासी ॥

6.31

परभृतकलगीतैर् ह्लादिभिः सद्वचांसि स्मितदशनमयूखान्कुन्दपुष्पप्रभाभिः ।करकिसलयकान्तिं पल्लवैर्विद्रुमाभैर् उपहसति वसन्तः कामिनीनामिदानीम् ॥

6.32

कनककमलकान्तैराननैः पाण्डुगण्डैर् उपरिनिहितहारैश् चन्दनार्द्रैः स्तनान्तैः ।मदजनितविलासैर् दृष्टिपातैर् मुनीन्द्रान् स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥

6.33

मधुसुरभि मुखाब्जं लोचने लोध्रताम्रे नवकुरबकपूर्णः केशपाशो मनोज्ञः ।गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव न भवति किमिदानीं योषितां मन्मथाय ॥

6.34

आकम्पितानि हृदयानि मनस्विनीनां वातैः प्रफुल्लसहकारकृताधिवासैः ।उत्कूजितैः परभृतस्य मदाकुलस्य श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥

6.35

रम्यः प्रदोषसमयः स्फुटचन्द्रभासः पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।मत्तालियूथविरुतं निशि सीधुपानं सर्वं रसायनमिदं कुसुमायुधस्य ॥

6.36

रक्ताशोकविकल्पिताधरमधुर् मत्तद्विरेफस्वनः कुन्दापीडविशुद्धदन्तनिकरः प्रोत्फुल्लपद्माननः ।चूतामोदसुगन्धिमन्दपवनः शृङ्गारदीक्षागुरुः कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम् ॥

6.37

मलयपवनविद्धः कोकिलालापरम्यः सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।विविधमधुपयूथैर् वेष्ट्यमानः समन्ताद् भवतु तव वसन्तः श्रेष्ठकालः सुखाय ॥

6.38

आम्री मञ्जुलमञ्जरी वरशरः सत्किंशुकं यद्धनुर् ज्या यस्यालिकुलं कलङ्करहितं छत्त्रं सितांशुः सितम् ।मत्तेभो मलयानिलः परभृता यद्बन्दिनो लोकजित् सो ऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥